# സാമ്പിൾ ചോദ്യപ്പേപ്പർ

## സംസ്കൃതം

# SANSKRIT Paper I

(Total No. of pages: 3)

**(For Academic & Sanskrit Schools)**

**Total Score : 50**

**SSLC** **Time : 1½ hrs**

I श्लोकं पठित्वा अधः प्रदत्तानां प्रश्नानाम् उत्तराणि लिखतु -

विजित्य यः प्राज्यमयच्छदुत्तरान्
कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुनाहरन्
करोति मन्युं न कथं धनञ्जयः।।

1. अस्मिन् श्लोके क्रियापदं किम्?
2. कः मन्युं न करोति?
3. श्लोके क्रोधः इत्यर्थे प्रयुक्तं पदं किम्?
4. "तवाधुनाहरन्" इत्यत्र सन्धिच्छेदः कः? 4 x 1 = 4

5 अधः प्रदत्तेषु आलापभेदयुक्तं श्लोकं विविच्य लिखत। 2

यद्यपाशसुगमो विभो भवान्
संयतः किमु सपाशयानया।
एवमादि दिविजैरभिष्टुतो
वातनाथ परिपाहि मां गदात्।।

भवन्तमेतर्हि मनस्विगर्हिते
विवर्तमानं नरदेव वर्त्मनि।
कथं न मन्युर्ज्वलयत्युदीरितःझ
शमीतरुं शुष्कमिवाग्निरुच्छिखः।।

स तस्य मध्ये भवनस्य संस्थितं
महद्विमानं मणिवज्रचित्रितम्।
प्रतप्तजाम्बूनदजालकृत्रिमं
ददर्श धीमान् पवनात्मजः कपिः।।

अधः प्रदत्तां खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।

आधुनिके काले लोकेषु आतङ्कवादिनां प्रभावः अधिकतया दृश्यते। ते तीव्रवादिनः निर्दाक्षिण्यं जनान् घ्नन्ति। न केवलं भारते किन्तु लोके सर्वत्रापि ते विहरन्ति। अनेनैव कारणेन सामान्यजनाः इदानीं भयाकुलाः एव जीवन्ति। आतङ्कवादिनः अस्मात् निवर्तयितुं कृताः सर्वेऽपि यत्नाः इदानीं पराजिताः। हा धिक्! सामन्यजनानाम् अवस्थाम्।।

6. अस्याः खण्डिकायाः उचितं शीर्षकं निर्दिशत।
7. आतङ्कवादिनः किं कर्तुम् उद्यताः भवन्ति?
8. खण्डिकायां "मारयन्ति" इत्यर्थे प्रयुक्तं पदं किम्?
9. "अनेनैव" इत्यस्य सन्धिच्छेदं लिखत। 5

10. एकस्मिन् दिने जोसफः स्वसुहृदा सह विमाननिस्थानं द्रष्टुं गतवान्। बहुकालानन्तरम् आगतम् आत्मसुहृदं विमानात् अवतारितं दृष्ट्वा सः अतीव सन्तुष्टः जातः।
अत्र कः न्यायः प्रवर्तते इति लिखत। 2

11. प्रदत्तं गद्यभागं प्रादेशिकभाषया विवर्तयत। 5
उल्लूर् एस्. परमेश्वरय्यर् महाभागः कैरल्यां आधुनिककवित्रयेषु अन्यतमः भवति। तेन रचितम् उमाकेरलाख्यं महाकाव्यम् अत्यन्तं प्रशस्तं भवति। सः कैरल्याम् अनेकान् ग्रन्थान् रचितवान्। तेन विरचितं केरलसाहित्यचरित्रं मलयालभाषायां महोन्नतं स्थानम् आवहति।

12. प्रदत्तयोः श्लोकयोः उपमालङ्कारयुक्तं श्लोकं विविच्य लिखतु।

भवन्तमेतर्हि मनास्विगर्हिते
    विवर्तमानं नरदेव वर्त्मनि।
कथं न मन्युर्ज्वलयत्युदीरितः
    शमीतरुं शुष्कमिवाग्निरुच्छिखः।।

भवादृशेषु प्रमदाजनोदितं
    भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां
    निरस्तनारीसमया दुराधयः।। 2

13. उदाहृतानुसारं वाक्यं परिवर्तयत।
उदा - यद्यपि रमेशः शीघ्रं बस्निस्थानं गतवान् तथापि बस् यानं न लब्धम्।
डेस्डिमोणा परिशुद्धा आसीत्। सा भर्त्रा अहन्यत। 1

14. अधः प्रदत्तेषु भवतः इष्टतमः श्लोकः कः? तस्य कारणं विशदयत।

वेदमार्गपरिमार्गितं रुषा
    त्वामवेक्ष्य परिमार्गयन्त्यसौ।
सन्ददर्श सुकृतिन्युलूखले
    दीयमाननवनीतमोतवे।।

एकदा दधिविमाथकारिणीं
    मातरं समुपसेदिवान् भवान्।
स्तन्यलोलुपतया निवारय-
    न्नङ्कमेत्य पपिवान् पयोधरौ।।

बन्धुमिच्छति यमेव सज्जन-
    स्तं भवन्तमयि बन्धुमिच्छती।

सा नियुज्य रशनागुणान् बहून्
द्व्यङ्गुलोनमखिलं किलैक्षत।।

- अथवा -

परिभ्रमल्लोहितचन्दनोचितः
पदातिरन्तर्गिरि रेणुरूषितः।
महाधनः सत्यधनस्य मानसं
दुनोति नो कच्चिदयं वृकोदरः।।

अस्मिन् श्लोके कविः कं वर्णयति। पूर्वं सः कीदृशः आसीदिति श्लोकानुसारं विशदयत। 4

15. सूचनानुसारं कथां विपुलीकरोतु।
कोऽपि वानरः ............ मित्रं ......... पक्षी ........... वृक्षाग्रे ............ कानने शैत्यं ........... शीतार्ताः ............ कम्पिताः ......... वानरः ........... खद्योतं ............... गृहीतवान् ................. उपरि शुष्कपर्णानि धमनं करोति ................... परिहसति .............. न अग्निकणः क्रुद्धः वानरः ............ नीडं ............ विशीर्णम्।
(*धमनं करोति - ഊതുന്നു, खद्योतः - മിന്നാമിനുങ്ങ്) ®t

16. कूटियाट्टे कथाकेल्यां च दृश्यमानानि त्रीणि वैजात्यानि लिखत। 3

17. पलायध्वं पलायध्वं रे रे दुष्कविकुञ्जराः।
वेदान्तवनसञ्चारी ह्यायात्युद्दण्डकेसरी।।
श्लोकानुसारं उद्दण्डस्य स्वभावविशेषान् निरूपयत।

- अथवा -

मार्गदर्शकः पुत्रः इति कथायां बोधिसत्वेन कथम् उपदेशः दत्तः इति विशदयत। 4

18. मुद्राङ्गुलीयकलाभाख्ये नाटकभागे धीवरेण लब्धे अङ्गुलीयके लिखितं नाम किमासीत्? 1

19. सूचनानुसारं यात्राविवरणं लिखत।
प्रातः ............ बस् यानं ......... तृश्शिवपुरम् (Thrissur)............... मलम्पुषा (Malampuzha) ......... सुहृदः ...... उद्यानं .......... सेतुः .........“रोप् वे” (Ropeway) ............ गगनसञ्चारः नौकाः .............. सायं प्रत्यागमनम्। 6

20. कोष्ठकात् उचितं रूपं स्वीकृत्य रिक्तस्थानानि पूरयत।
कस्मिन्नपि गर्ते कोऽपि ............ वसति स्म। रात्रौ सर्वदापि.................... उच्चैः शब्दं कृतम्। तत् श्रुत्वा अन्ये जन्तवः विस्मिताः अभवन्। 2
(भेकः, भेकस्य, तेन, सः)

21. प्रदत्तेभ्यः महाकाव्यानि चरित्रकाव्यानि च विविच्य पट्टिकारूपेण लिखत। 3
रघुवंशम्, मूषकवंशम्, शिवविलासम्, श्रीकृष्णविलासम्, नलचरितम्, उदयवर्मचरितम्।

# SANSKRIT Paper II

**(For Sanskrit Schools)**

**Total Score : 50**

**SSLC** **Time : 1½ hrs**

I कोष्ठात् समुचितमुत्तरं निर्धार्य लिखत- 5 x 1 = 5

1. अपगतमले हि मनसि सुखेन विशन्ति। के?
   (विशेषगुणाः, दुर्गुणाः, उपदेशगुणाः)
2. प्रातः प्रबुध्य हयमारुह्य काननं प्रतस्थे। कः?
   (दम्भः, केशवः, पद्मिनी)
3. अर्थालङ्कारः भवति ..........।
   (अनुप्रासः, व्यतिरेकः, यमकम्)
4. मन्दाक्रान्ता नाम वृत्ते प्रतिपादं ............. वर्णाः सन्ति।
   (सप्तदश, पञ्चदश, एकविंशति)
5. अर्थवदधातुरप्रत्ययः .................।
   (उपसंख्यानम्, अपादानम्, प्रातिपदिकम्।)

II कोष्ठके दत्तस्य पदस्य उचितरूपेण रिक्तस्थानानि पूरयत- 5 x 1 = 5

6. अर्थी ................... धनं याचते (धनिकः)
7. ................... उभयतः वृक्षाः वर्तन्ते। (मार्गः)
8. माता ................... क्षीरं यच्छति। (शिशुः)
9. आरक्षिकः जनं ................... त्रायते। (चोरः)
10. विद्यार्थिनः ................... उपविशन्ति। (कक्ष्या)

11. प्रदत्तयोः श्लोकांशयोः मालिनी वृत्तस्य उदाहरणम् उद्धृत्य सलक्षणं निरूपयत- 4

- आनन्दरूपभगवन्नयि तेऽवतारे
  प्राप्ते प्रदीप्त भवदङ्गनिरीयमाणैः।

- अनुसरति जनौधे कौतुकव्याकुलाक्षे
  किमपि कृतनिनादं व्याहसन्तौ द्रवन्तौ।।

12. अधो निर्दिष्टयोः कस्यचन वृत्तस्य लक्षणं सोदाहरणं निरूपयत - 4

    वियोगिनी। स्रग्धरा।

13. अधो दत्तयोः विरोधाभासालङ्कारस्य उदाहरणं विविच्य सलक्षणं निरूपयत - 4

एकः कृती शकुन्तेषु
योऽन्यं शक्रान्न याचते।

विनापि तन्वि! हारेण
वक्षोजौ तव हारिणौ।

14. अधो निर्दिष्टयोः कस्यचन अलङ्कारस्य लक्षणं सोदाहरणं निरूपयत- 4

अर्थापत्तिः। काव्यलिङ्गम्।

15. सूचनानुसारं कथां विपुलीकुरुत - 5

विप्रः ............ रात्रिः ............ तस्कराः ............ भार्या ............ पेटिकायां ............ पाषाणखण्डानि ............ कूपे ............ मोषकाः ............ कूपं रिक्तं ............ केरवृक्षः ............ सेचनम् ............ पेटिकां उद्धृत्य ............ लज्जिताः ............ पलायिताः।।

16. शुकनासोपदेशात् भवतः इष्टतमं कमपि आप्तवाक्यम् उद्धृत्य आशयं विशदयत। 5

अथवा

शुकनासेन उपवर्णितं लक्ष्मीस्वभावं विशदयत।

17. भषकारण्ययक्षीति कथायां केशवस्य स्वभावविशेषं निरूपयत। 5

अथवा

किमर्थं पद्मिनी भषकारण्ये अवसत् इति विशदयत।

18. प्रदत्तं गद्यभागं पठित्वा प्रश्नानां पूर्णवाक्येन उत्तरं लिखत - 5 x 1 = 5

भारतवर्षे हिमालयो नाम महीधरः अतीव प्रसिद्धः। ये पर्वताः सन्ति तेषु श्रेष्ठोऽसौ। अत एवैनं नगाधिराजः इति कथयन्ति जनाः। अत्युच्चानि शिखराणि शैलस्यैतस्य। भारतवर्षस्य उत्तरस्यां दिशि पर्वतोऽयं तिष्ठति। एवं सीमाप्रदेशे रक्षक इव स्थित्वा असौ राष्ट्रं रक्षति।

1. हिमालयपर्वतः कस्यां दिशि वर्तते?
2. पर्वतस्य अस्य शिखराणि कीदृशानि भवन्ति?
3. जनाः कुतः एनं पर्वतराजं कथयन्ति?
4. भारतवर्षे स्थितेषु पर्वतेषु श्रेष्ठः कः?
5. खण्डिकातः पर्वतः इत्यर्थयुक्तं पदद्वयं लिखत।

19. ताते वृद्धे संवृत्ते पुत्रः गृहकार्याणि निर्वहति स्म। वाक्यमिदं यदा - तदा प्रयोगेण परिवर्तयत। 2

20. यदा वायुः चलति तदा मेघाः अपसरन्ति। 2
वाक्यमिदं सति सप्तम्याः प्रयोगेण परिवर्तयत।

# प्रश्नापग्रथनम्

**SSLC** **questionwise Analysis** **Sanskrit**

| Qn. No. | C.O. Cluster | Mental Process | Type of Qns. | Score | % | Time Min. |
|---|---|---|---|---|---|---|
| 1 | साहित्यपरम् | आशयानुस्मरणं वर्गीकरणम् च | 0 | 1 | 2 | 1 |
| 2 | साहित्यपरम् | आशयानुस्मरणं वर्गीकरणम् च | 0 | 1 | 2 | 1 |
| 3 | शास्त्रपरम् | आशयानुस्मरणं वर्गीकरणम् च | 0 | 1 | 2 | 1 |
| 4 | शास्त्रपरम् | आशयानुस्मरणं वर्गीकरणम् च | 0 | 1 | 2 | 1 |
| 5 | शास्त्रपरम् | आशयानुस्मरणं वर्गीकरणम् च | 0 | 1 | 2 | 1 |
| 6 | शास्त्रपरम् | अवगतांशानां नूतनसन्दर्भे प्रयोगः | 0 | 1 | 2 | 1 |
| 7 | शास्त्रपरम् | अवगतांशानां नूतनसन्दर्भे प्रयोगः | 0 | 1 | 2 | 1 |
| 8 | शास्त्रपरम् | अवगतांशानां नूतनसन्दर्भे प्रयोगः | 0 | 1 | 2 | 1 |
| 9 | शास्त्रपरम् | अवगतांशानां नूतनसन्दर्भे प्रयोगः | 0 | 1 | 2 | 1 |
| 10 | शास्त्रपरम् | अवगतांशानां नूतनसन्दर्भे प्रयोगः | 0 | 1 | 2 | 1 |
| 11 | शास्त्रपरम् | अवगतांशानां नूतनसन्दर्भे प्रयोगः | SA | 4 | 8 | 9 |
| 12 | शास्त्रपरम् | अवगतांशानां नूतनसन्दर्भे प्रयोगः | SA | 4 | 8 | 9 |
| 13 | शास्त्रपरम् | अवगतांशानां नूतनसन्दर्भे प्रयोगः | SA | 4 | 8 | 9 |
| 14 | शास्त्रपरम् | अवगतांशानां नूतनसन्दर्भे प्रयोगः | SA | 4 | 8 | 9 |
| 15 | साहित्यपरम् | सूचनानुसारं संभावना | E | 5 | 10 | 10 |
| 16 | साहित्यपरम् | लब्धाशयानां अपग्रथनं कृत्वा नूतनाशयानां निगमनम् | E | 5 | 10 | 10 |
| 17 | साहित्यपरम् | लब्धाशयानां अपग्रथनं कृत्वा नूतनाशयानां निगमनम् | E | 5 | 10 | 10 |
| 18 | साहित्यपरम् | अवगतांशानां नूतनसन्दर्भे प्रयोगः | SA | 5 | 10 | 10 |
| 19 | शास्त्रपरम् | कार्यकारणबन्धविवेचनम् | SA | 2 | 4 | 2 |
| 20 | शास्त्रपरम् | कार्यकारणबन्धविवेचनम् | SA | 2 | 4 | 2 |

| SSLC | Sanskrit Paper II | | Scoring Key |
|---|---|---|---|
| Q. No. | मूल्यनिर्णयसूचकाः | अङ्काः | आहत्य अङ्काः |
| 1 | उचितस्य उत्तरस्यकृते - उपदेशगुणाः | पूर्णोङ्कः | 1 |
| 2 | उचितस्य उत्तरस्यकृते - केशवः | पूर्णोङ्कः | 1 |
| 3 | उचितस्य उत्तरस्यकृते - व्यतिरेकः | पूर्णोङ्कः | 1 |
| 4 | उचितस्य उत्तरस्यकृते - सप्तदश | पूर्णोङ्कः | 1 |
| 5 | उचितस्य उत्तरस्यकृते - प्रातिपदिकम् | पूर्णोङ्कः | 1 |
| 6 | समीचीनस्य पदस्य रूपवत्करणाय - धनिकं | पूर्णोङ्कः | 1 |
| 7 | समीचीनस्य पदस्य रूपवत्करणाय - मार्गम् | पूर्णोङ्कः | 1 |
| 8 | समीचीनस्य पदस्य रूपवत्करणाय - शिशवे | पूर्णोङ्कः | 1 |
| 9 | समीचीनस्य पदस्य रूपवत्करणाय - चोरात् | पूर्णोङ्कः | 1 |
| 10 | समीचीनस्य पदस्य रूपवत्करणाय - कक्ष्यायां | पूर्णोङ्कः | 1 |
| 11 | श्लोकांशविवेचनाय<br>लक्षणस्य कृते<br>समन्वयस्य कृते | एकः अङ्कः<br>एकः अङ्कः<br>द्वौ अङ्कौ | 4 |
| 12 | लक्षणलेखनाय<br>उदाहरण लेखनाय<br>समन्वयस्य कृते | एकः अङ्कः<br>एकः अङ्कः<br>द्वौ अङ्कौ | 4 |
| 13 | उदाहरण विवेचनाय<br>लक्षणस्य कृते<br>समन्वयस्य कृते | एकः अङ्कः<br>एकः अङ्कः<br>द्वौ अङ्कौ | 4 |
| 14 | उदाहरण लेखनाय<br>लक्षणस्य कृते<br>निरूपणाय | एकः अङ्कः<br>एकः अङ्कः<br>द्वौ अङ्कौ | 4 |
| 15 | कथायाः स्वरूपतायै<br>वाक्यघटनायाः | त्रयः अङ्काः<br>द्वौ अङ्कौ | 5 |

| | | | |
|---|---|---|---|
| 16 | आप्तवाक्य चयनाय<br>आशयसमर्थनाय | द्वौ अङ्कौ<br>त्रयः अङ्काः | 5 |
| 17 | आशयग्रहणस्य<br>आशयावतारणाय<br>आशयसमर्थनाय | एकः अङ्कः<br>एकः अङ्कः<br>त्रयः अङ्काः | 5 |
| 18 | समीचीनस्य एकैकस्य उत्तरस्य कृते<br>एकैकोङ्कः | 5 x 1 = 5 | 5 |
| 19 | समीचीनस्य उत्तरस्य पूर्णोङ्कः | द्वौ अङ्कौ | 2 |
| 20 | समीचीनस्य उत्तरस्य पूर्णोङ्कः | द्वौ अङ्कौ | 2 |

# Sanskrit Paper - I
## (For Academic & Sanskrit Schools)

**SSLC**

**Total Score : 50**
**Time : 1½ hrs**

| प्रश्नसंख्या | मूल्यनिर्णयसूचकाः | अङ्काः |
|---|---|---|
| 1 | उचितस्य उत्तरस्य कृते एकः अङ्कः। करोति। | 1 |
| 2 | धनञ्जयः। | 1 |
| 3 | मन्युः। | 1 |
| 4 | तव + अधुना + आहरन्। | 1 |
| 5 | प्रथमः श्लोकः। उचितस्य उत्तरस्य कृते। | 2 |
| 6 | समुचितस्य शीर्षकस्य कृते। एकः अङ्कः। | 1 |
| 7 | उचितस्य उत्तरस्य कृते एकः अङ्कः।<br>वाक्यघटनानुसारं लिखति चेत् एकः अङ्कः। | 2 |
| 8 | 'घ्नन्ति' इति उत्तरस्य कृते। | 1 |
| 9 | अनेन + एव इति उचितया रीत्या लेखनाय। | 1 |
| 10 | अत्र न्यायलेखनाय। | 2 |
| 11 | आशयनष्टं विना विवर्तनं करोति चेत्।<br>विवर्तनस्य भाषासौकुमार्याय। | 4<br>1 |
| 12 | उपमालङ्कारयुक्तस्य श्लोकस्य चयनाय।<br>अत्र प्रथमः श्लोकः | 2 |
| 13 | वाक्यं यथोचितं परिवर्तयति चेत्। | 1 |
| 14 | श्लोकस्य चयनाय।<br>सयुक्तिकसमर्थनाय।<br>- अथवा -<br>कविः कं वर्णयति इति लेखनाय<br>पूर्वं कीदृशः आसीदिति विशदीकरणाय | 2<br>2<br><br>1<br>3 |

| | | |
|---|---|---|
| 15 | सूचनाः सर्वाः स्वीकृताः चेत्<br>सूचनानुसारं कथायाः विपुलीकरणाय<br>शुद्धया भाषया लिखति चेत्। | 2<br>3<br>1 |
| 16 | एकैकस्य वैजात्यस्य लेखनाय एकैकः अङ्कः।<br>त्रयाणां वैजात्यानां लेखनाय। | <br>3 |
| 17 | उद्दण्डस्य स्वभावविशेषं सूचयति चेत्<br>उद्दण्डस्य स्वभावविशेषान् विशदया रीत्या वर्णयति चेत्।<br>- अथवा -<br>वसिष्ठकस्य पुत्रः एव बोधिसत्वः इति सूचयति चेत्।<br>बालकेन कृतं कार्यं समीचीनया रीत्या विशदयति चेत्। | 2<br>2<br><br>1<br>3 |
| 18 | दुष्यन्तः इति लिखति चेत्। | 1 |
| 19 | सूचनाः सर्वाः स्वीकृताः चेत्<br>उचितया रीत्या यात्राविवरणस्य लेखनाय<br>भाषाशुद्ध्यर्थं। | 2<br>3<br>1 |
| 20 | उचितं पदं उपयुज्य पूरणाय एकः अङ्कः | 2 |
| 21 | रघुवंशम्, श्रीकृष्णविलासं, नलचरितं च महाकाव्यानि।<br>अन्यानि चरित्रकाव्यानि।<br>एकस्य कृते अर्धाङ्कः। आहत्य। | <br><br>3 |

## Sanskrit Paper - I

**SSLC**

## पाठ्यचर्योद्देश्यसंघातस्य आपेक्षिकमानता

### Weightage to Curriculum Cluster

| Sl. No. | Curriculum Cluster | No. of qns. | Score | % |
|---|---|---|---|---|
| 1 | 2/1, 3/1, 4/1, 8/1, 9/1, 10/1 | 8 | 15 | 30 |
| 2 | 1/2, 6/2 | 2 | 10 | 20 |
| 3 | 1/3, 2/3, 7/3 | 6 | 10 | 20 |
| 4 | 2/4 | 1 | 6 | 12 |
| 5 | 1/5 | 1 | 1 | 2 |
| 6 | 5/6, 2/6, 7/6 | 3 | 8 | 16 |
| | Total | 21 | 50 | 100 |

## प्रश्नमातृकायाः आपेक्षिकमानता

### Weightage to Type of Questions

| Sl. No. | Type of questions | No. of qns. | Score | % |
|---|---|---|---|---|
| 1 | Objective | 7 | 9 | 18 |
| 2 | Short Answer | 11 | 24 | 48 |
| 3 | Essay | 3 | 17 | 34 |
| | Total | 21 | 50 | 100 |

# Questionwise Analysis

**SSLC** **Sanskrit**

| Qn. No | C.O. Cluster | Type of qn. | Mental Process | Score | Time Min. |
|---|---|---|---|---|---|
| 1 | 2/1 | Objective | लब्धाशयानाम् अपग्रथनं कृत्वा नूतनाशयान् निगमयति | 1 | 2 |
| 2 | 2/1 | Objective | लब्धाशयानाम् अपग्रथनं कृत्वा नूतनाशयान् निगमयति | 1 | 2 |
| 3 | 3/1 | Objective | लब्धाशयानाम् अपग्रथनं कृत्वा नूतनाशयान् निगमयति | 1 | 2 |
| 4 | 3/1 | Objective | लब्धाशयानाम् अपग्रथनं कृत्वा नूतनाशयान् निगमयति | 1 | 2 |
| 5 | 9/1 | Short Answer | साजात्यवैजात्यान् विवेचयति | 2 | 3 |
| 6 | 1/3 | Short Answer | लब्धाशयानाम् अपग्रथनं कृत्वा नूतनाशयान् निगमयति | 1 | 3 |
| 7 | 1/3 | Short Answer | लब्धाशयानाम् अपग्रथनं कृत्वा नूतनाशयान् निगमयति | 2 | 3 |
| 8 | 1/3 | Short Answer | लब्धाशयानाम् अपग्रथनं कृत्वा नूतनाशयान् निगमयति | 1 | 2 |
| 9 | 1/3 | Short Answer | लब्धाशयानाम् अपग्रथनं कृत्वा नूतनाशयान् निगमयति | 1 | 2 |
| 10 | 7/3 | Short Answer | लब्धाशयानाम् अपग्रथनं कृत्वा नूतनाशयान् निगमयति | 2 | 3 |
| 11 | 7/6 | Essay | अवगतांशान् नूतनसन्दर्भेषु प्रयुज्यते | 5 | 10 |
| 12 | 8/1 | Short Answer | साजात्यवैजात्यान् विवेचयति | 2 | 4 |

| | | | | | |
|---|---|---|---|---|---|
| 13 | 2/6 | Objective | अवगतांशान् नूतनसन्दर्भेषु प्रयुज्यते | 1 | 2 |
| 14 | 10/1 | Short Answer | कार्यकारणबन्धं विवेचयति। लब्धांशानाम् अपग्रथनं कृत्वा नूतनाशयान् निगमयति | 4 | 8 |
| 15 | 6/2 | Essay | सूचनानुसारं संभावयति | 6 | 12 |
| 16 | 2/3 | Short Answer | आशयान् अनुस्मरति। साजात्यवैजात्यान् विवेचयति। आशयान् वर्गीकरोति | 3 | 4 |
| 17 | 1/2 | Short Answer | लब्धाशयानाम् अपग्रथनं कृत्वा नूतनाशयान् निगमयति | 4 | 5 |
| 18 | 1/5 | Objective | आशयान् अनुस्मरति | 1 | 1 |
| 19 | 2/4 | Essay | सूचनानुसारं संभावयति आशयानधिकृत्य नूतनाशयान् रूपवत्करोति | 6 | 15 |
| 20 | 5/6 | Short Answer | लब्धाशयानाम् अपग्रथनं कृत्वा नूतनाशयान् निगमयति | 2 | 2 |
| 21 | 4/1 | Objective | आशयान् वर्गीकरोति | 3 | 3 |
| | | | Total | 50 | 90 |

## Blue Print

**SSLC** **Sanskrit**

## परिनिष्ठापत्रम्

| Sl. No. | Curriculum Cluster | No. of qns. | | | Total |
|---|---|---|---|---|---|
| | | Objective | Short Answer | Essay | |
| 1 | 2/4, 3/1, 4/1, 8/1<br>9/1, 10/1 | 4 (4)<br>3 (1) | 4 (2)<br>4 (4) | | 15 (8) |
| 2 | 1/2, 6/2 | | 4 (1) | 6 (1) | 10 (2) |
| 3 | 1/3, 2/3, 7/3 | | 5 (4)<br>2 (1)<br>3 (1) | | 10 (6) |
| 4 | 2/4 | | | 6 (1) | 6 (1) |
| 5 | 1/5 | 1 (1) | | | 1 (1) |
| 6 | 2/6, 5/6, 7/6 | 1 (1) | 2 (1) | 5 (1) | 8 (3) |
| | Total | 9 (7) | 24 (11) | 17 (3) | 50 (21) |